SANSHODHAN : 2021 - 22 (VOL.NO. 11) ISSN 2249-8567
10.53957/sanshodhan/2022/v11i1/169798

# कर्तृकर्मणोःकृति 2/3/65

स्वाती ईश्वर लोडे

अष्टाध्यायां द्वितीयऽध्यायस्य तृतीयपादे पञ्चषष्ठीतमं सूत्रमिदं "कर्तृकर्मणोः कृति" २/३/६५ इति। कर्तृकर्मणोः, कृति इति पदविभागः। द्विपदात्मकं सूत्रमिदम्। सूत्रे अस्मिन् २/३/१ "अनभिहिते" इति सूत्रस्य अधिकारः, २/३/५० "षष्ठी शेषे" इति सूत्रस्य अनुवृत्तिः च भवति। "कर्तुरीप्सिततमं कर्म" १/४/४९ इति सूत्रेण कर्मसञ्ज्ञा विधीयते। 'हरिं भजति' इत्यत्र "कर्मणि द्वितीया" २/३/२ इति सूत्रेण द्वितीयाविभक्तिसिद्धिः कर्मसञ्ज्ञाः प्रयोजनम्। एवं "स्वतन्त्रः कर्ता" १/४/५४ इति सूत्रेण कर्तृसञ्ज्ञायाः विहिता। "कर्तृकरणयोस्तृतीया" २/३/१८ इति सूत्रेण तृतीयाविक्तिसिद्धिः कर्मसञ्ज्ञायाः प्रयोजनम्। यथा 'रामेण हन्यते' इति। अनया रीत्या कर्मणि प्राप्तां द्वितीयां कर्तरि प्राप्तां तृतीयां च बाधित्वा "कर्तृकर्मणोः कृति" इति सूत्रेण षष्ठीविभक्तिः विधीयते। एवं कृद्योगे कर्तरि कर्मणि च षष्ठी स्यात् इति सूत्रार्थः।

कर्तरि षष्ठ्याः उदाहरणम्- **कृष्णस्य कृतिः** इति। कृष्णकर्तृका कृतिः इति बोधः। कर्मणि षष्ठ्याः उदाहरणम्- **जगतः कर्ता कृष्णः** इति। जगत्कर्मिका कृति इति बोधः।

अत्र वार्तिकं पठितं यथा- 'गुणकर्मणि वेष्यते' इति। कर्म द्विप्रकारकः- प्रधानकर्मः गौणकर्मः इति। प्रधानकर्मयोगे नित्यं षष्ठीविभक्तिः प्रवर्तते। अप्रधानकर्मयोगे विकल्पेन द्वितीयाविभक्तिः अपि भवति। इदं सर्वमपि "अकथितं च" १/४/५१ इति सूत्रे भाष्ये स्पष्टम्। प्रकृतवार्तिके गौणकर्मयोगे द्वितीया षष्ठी च विकल्पेन सिद्ध्यति।

शोधछात्रा, व्याकरणविभागः, राष्ट्रीयसंस्कृतविद्यापीठम्, तिरुपतिः
Email : swateelode4@gmail.com | Mob. No. 80969 36593

अत्र शंङ्का विधीयते यत् अस्मिन् सूत्रे 'कृति' इति कथनेन 'कृतपूर्वी कटम्' इति तध्दितान्तस्थले षष्ठीविभक्तिर्वायते। यद्यपि अस्मिन् उदाहरणे कृत इति शब्दः कृदन्त एव। अतः षष्ठी कथं वार्यते इति। कृतशब्दस्य निष्ठान्तत्वेन "न लोकाव्ययनिष्टाखलर्थतृनाम्" इति निषेधात् षष्ठी न। अतो न दोषः इति समाधानम्।

पुनः शङ्का वर्तते यत् सूत्रे 'कृति' इति शब्दः अनावश्यकः। तथा हि- धातोः द्विविधाः प्रत्ययाः उत्पद्यन्ते। तिङ्प्रत्ययाः, कृत्प्रत्ययाः इति। तत्र तिङ्गन्तयोगे तिङां लादेशत्वेन "न लोकाव्ययनिष्टाखलर्थतृनाम्" इति निषेधात् षष्ठी न प्रवर्तते किन्तु द्वितीयैव। यथा- हरिं भजति। एवञ्च कृदन्तयोगे एव षष्ठीविभक्तेःप्रवृत्त्या पुनः सूत्रे 'कृति' इति पदमनावश्यमेवेति। अस्य समाधानं प्रागुक्तरीत्या कृद्ग्रहणं व्यर्थं सत् यस्मिन् प्रयोगे क्रियायाः उपस्थितौ कृदन्तशक्तिज्ञानं यत्र सहकरोति तत्रैव षष्ठी। यथा- तण्डुलस्य पाचकः इति। यत्र तु न सहकरोति तत्र न षष्ठी। यथा- कृतपूर्वी कटम्। अत्र कृ धातुः वस्तुतः सकर्मकः किन्तु तत्र कर्मणः अविवक्षायां तस्य धातोः अकर्मकत्वात् भावे क्तप्रत्ययो विधीयते। ततः कृतः पूर्वं कटः अनेन इत्यर्थे कृतपूर्वशब्दात् 'सपूर्वाच्च' इति सूत्रेण इनिप्रत्यये कृतपूर्वी शब्दः निष्पन्नः।

एवञ्च अत्र क्रियायाः उपस्थितौ कृदन्तशक्तिज्ञानं न सहकरोति इति कारणेन प्रकृतसूत्रेण षष्ठीविभक्तिर्न प्रवर्तते। अमुमेवाशयं मनसि निधाय भगवता भाष्यकृता उक्तं यथा- **"यदा वाक्यं न तदा प्रत्ययः, यदा प्रत्ययः सामान्येन तदा वृत्तिः"** इति। अस्मिन् भाष्ये 'न तदा प्रत्ययः' इत्यस्य कृतः पूर्वं कटः अनेन इति वाक्ये। किन्तु कर्मण्येव न तदा भावे प्रत्ययःइत्यर्थः। 'यदा प्रत्ययः' इत्यस्य यदा भावे प्रत्ययः इत्यर्थः। तदा वृत्तिरेव यथा- कृतपूर्वी कटम्। साच वृत्तिः कर्मकान्तेन न कदापि प्रवर्तते धातोरकर्मकत्वात्। अनेन च भाष्येण एतादृशभावक्तान्तस्य वाक्ये न प्रयोगाः इति लभ्यते। एवञ्चास्मिन् वाक्ये क्रियायाः उपस्थितौ कृदन्तशक्तिज्ञानं न सहकरोति हेतोः षष्ठी न प्रवर्तते इति।

अत्र नैयायिकानां मते- यत्र शक्यतावच्छेदकैक्यसम्भवः तत्र तत्सूत्रं शक्तिग्राहकम्। यत्र तु शक्यतावच्छेदकैक्यं न सम्भवति, तत्सूत्रं न शक्तिग्राहकम्। "अकतिथञ्च" इत्यादीनि कर्मसञ्ज्ञा विधायकानि सूत्राणि तु लाक्षणिकानुशाकनानि। एवमेव कर्तरि तृतीयाविधानेन शक्यतावच्छेदकैक्यस्य असम्भवात् "कर्तृकर्मणोः कृति" इति सूत्रं लाक्षणिकानुशासनम्। एवञ्च कर्तरि तृतीया, कर्मणि द्विवितीया च शक्तिग्राहकत्वेन स्वीकर्तुं शक्येते "कर्तृकर्मणोः कृति" इति सूत्रन्तु तयोरर्थयोः षष्ठीं विधत्ते। अतः लाक्षणिकमिदमनुशासनम् इति।

अत्र नागेशसिद्धान्तमते- **शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यद्वयवहारतश्च।**

**वाक्यस्य शेषाद्विवृतेर्वदन्ति सन्निध्यतः सिद्धपदस्य वृध्दाः।।**

इति वचनप्रामाण्येन व्याकरणशास्त्रस्य शक्तिग्राहकत्वमेव, न तु लक्षणाग्राहकत्वम्। व्याकरणशास्त्रस्य कुत्रापि लाक्षणिकमनुशासनं नास्त्येव। अत एव 'गङ्गायां घोषः' इत्यादौ आरोपिताधारत्वेऽपि सप्तम्याः शक्तिरेव न तु लक्षणेति।

परिशीलितग्रन्थसूची –


- अष्टाध्यायी, पाणिनिः- व्याख्याकारः- डा. नरेश झा – चौख्मबा सुरभारती प्रकाशन, वाराणसी।
- व्याकरणमहाभाष्यम् – सम्पादकः डा. आत्मदेवमिश्रः - चौख्मबा सुरभारती प्रकाशन, वाराणसी।
- वैयाकरणसिद्धान्तकौमुदी – तत्वबोधिनीव्याख्यासंवलिता।
- वैयाकरणसिद्धान्तलघुमञ्जुषा – सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी।
- वाक्यपदीयम् - चौख्मबा सुरभारती प्रकाशन, वाराणसी- 1928